# सदाशिव कवचं

श्री गणेशाय नमः

श्री देव्युवाचः–
भगवन् देवदेवेश सर्व्वाम्नाय प्रपूजित
सर्व्वं मे कथितं देव कवचं न प्रकाशितं 1

प्रसादाख्यस्य मन्त्रस्य कवचं मे प्रकाशाय
सर्व्वरक्षाकरं देव यदि स्नेहो/स्ति मां प्रति 2

श्री भगवानुवाचः–
प्रसादमन्त्रकवचस्य वामदेव ऋषिः
पंक्तिश्चन्दः सदाशिवो देवता
सकलाभीष्ट सिद्धये जपे विनियोगः

शिरो मे सर्व्वदा पातु प्रसादाख्याः सदाशिवः
षडक्षरस्वरूपो मे वदनं तु महेश्वरः 3

पञ्चाक्षरात्मा भगवान् भुजौ मे परिरक्षतु
मृत्युञ्जयस्त्रिबीजात्मा आस्यं रक्षतु मे सदा 4

वटमूलं समासीनो दक्षिणामूर्त्तिरव्ययं
सदा मां सर्व्वदः पातु षट्त्रिंशार्ण्णस्वरूपधृक् 5

द्वाविंशार्ण्णात्मको रुद्रो दक्षिणः परिरक्षतु

त्रिवर्ण्णात्मा नीलकण्ठः कण्ठं रक्षतु सर्व्वदा 6

चिन्तामणिर्बीजरूपो ह्रर्द्धनारीश्वरो हरः
सदा रक्षतुमे गुह्यं सर्व्वसन्पत्प्रदायकः 7

एकाक्षरस्वरूपात्मा कूटव्यापी महेश्वराः
मार्त्ताण्डभैरवो नित्यं पादौ मे परिरक्षतु 8

तुंबुराख्यो महाबीजस्वरूपस्त्रिपुरान्तकः
सदा मां रणभूमौ च रक्षतु त्रिदशाधिपः 9

ऊर्द्ध्वमूर्द्धानमीशानो मम रक्षतु सर्व्वदा
दक्षिणास्यं तत्पुरुषः पायान्‍ मे गिरिनायकः 10

अघोराघ्यो महादेवःपूर्व्वास्यं परिरक्षतु
वामदेवः पश्चिमास्यं सदा मे परिरक्षतु 11

उत्तरास्यं सदा पातु सद्योजात स्वरूपधृक्
इत्थं रक्षाकरं देवि कवचं देवदुर्ल्लभं 12

प्रातःकाले पठेत् यस्तुसो / भीष्टं फलमाप्तयात्
पूजाकाले पठेत् यस्तु कवचं साधकोत्तमः 13

कीर्त्तिश्रीकान्तिमेधायुः सहितो भवति ध्रुवं
कण्ठे यो धारयेदेतत् कवचं मत्स्वरूपकं 14

युद्धे च यजमाप्नोति द्युते वादे स साधकः
कवचं शारयेभ्यस्तु साधको दक्षिणेभुजे 15

देवा मनुष्या गन्धर्व्वा वश्यास्तस्य न संशयः
कवचं शिरसा यस्तु धारयेद् यतमानसः 16

करस्थास्तस्य देवेशी अणिमाद्यष्ट सिद्धयः
भूर्ज्जपात्रे त्विमां विद्यां शुक्लपट्टेन वेष्टितां 17

रजतोदरसंविष्टां कृत्वा वा धारयेत्सुधीः
सन्प्राप्य महतिं लक्ष्मीमन्ते मद्देहरूपभाक् 18

यस्मै कर्मै न दातव्यं न प्रकाश्यं कदाचन
शिष्याय भक्तियुक्ताय साधकाय प्रकाशयेत् 19

अन्यथा सिद्धिहानिः स्यात् सत्यमेतन्मनोरमे
तव स्नेहान्महादेवि कथितं कवचं शुभं 20

न देयं कस्यचिद् भद्रे यदीच्छेदात्मनोहितं
योर्च्चयेद् गन्धपुष्पाद्यैः कवचं मन्मौखोदितं 21

तेनार्च्चिता महादेविसर्व्वे देवा न संशयः

(इति भैरवतन्त्रे सदाशिवकवचं संपूर्ण्णं) ver 0.1